E-ISSN 2582-5429
SJIF Impact - 5.675

# AKSHARA
## MULTIDISCIPLINARY RESEARCH JOURNAL

Peer-Reviewed & Refereed International Research Journal
April 2024 Special Issue 12 Volume V




Chief Editor : Dr. Girish S. Koli
Akshara Publication

# Akshara Multidisciplinary Research Journal

## Peer-Reviewed & Refereed International Research Journal

**April 2024**

**Special Issue 12 Volume V**

Scientific Journal of Impact Factor (SJIF) Impact-5.67

Scientific Journal Impact Factor

TOGETHER WE REACH THE GOAL

International Impact Factor Services

International Society for Research Activity (ISRA) Journal-Impact-Factor (JIF)

Digital Online Identifier-Database System

*Akshara Publication*

Plot No 143 Professors colony,
Near Biyani School, Jamner Road, Bhusawal Dist Jalgaon Maharashtra 425201

E- ISSN 2582-5429

Akshara Multidisciplinary Research Journal
Single Blind Peer Reviewed & Refereed International Research Journal
SJIF Impact- 5.67
AMRJ
April 2024 Special Issue 12 Volume V

## Editorial Board

### -: Chief & Executive Editor:-

**Dr. Girish Shalik Koli**
Dongar Kathora
Tal.Yawal, Dist. Jalgaon [M. S.] India Pin Code: 425301
Mobile No: 09421682612
Website:www.aimrj.com Email:aimrj18@gmail.com

### -:Co-Editors :–

- **Dr. Sirojiddin Nurmatov,** *Associate Professor, Tashkent Institute of Oriental Studies, Tashkent City, Republic Of Uzbekistan*
- **Dr.Vivek Mani Tripathi,** Assistant Professor, *Faculty of Afro – Asian Languages and Cultures, Guangdong University of Foreign Studies, Guangzhou, Guangdong, China*
- **Dr.Maxim Demchenko** *Associate Professor Moscow State Linguistic University, Institute of International Relationships, Moscow,Russia*
- **Dr.Mohammed Abdraboo Ahmed Hasan,** *Assistance Professor (English) The Republic of Yemen University of Abyan General manager of Educational affairs in University of Abyan ,Yemen.*
- **Dr. Wajira Gunasena,** *Lecturer, Dept of Languages, Cultural studies & Performing Arts University of Sri Jayewardenepura, Nugegoda, Sri Lank*
- **Shiv Kumar Singh** , *Lecturer, Indian Faculty of Arts and Humanities, University of Lisbon Portugal.*
- **Dr. Vijay Eknath Sonje,** *Assistant Professor* (Hindi) D. N. College, Faizpur [M. S.]
- **Mr. Nilesh Samadhan Guruchal,** *Assistant Professor* (English)Smt. P. K. Kotecha Mahila Mahavidyalaya, Bhusawal, Dist. Jalgaon [M. S.] India.
- **Dr. Shaikh Aafaq Anjum,** *Assistant Professor* (Urdu) Nutan Maratha College, Jalgaon. [M. S.] India.
- **Mr. Dipak Santosh Pawar,** *Assistant Professor* (Marathi)Dr. A.G.D. Bendale Mahila Mahavidyalya, Jalgaon [M. S.] India.

### PEER REVIEW POLICY

*AMRJ will send a copy of research work to the editorial board. The board will verify the same according to the rules of research methodology. Then plagiarism in the work will be checked. In case if the research methodology is not followed properly by the researcher, message will be given to the researcher and he/she will be asked to revise the work in a stipulated period.*

*After checking research methodology and plagiarism, the work will be sent to the Peer Review Committee.*

### SINGLE BLIND PEER REVIEW BY EXPERT PEER REVIEWERS

*AMRJ adopts the Single Blind Peer Review Method. After checking research methodology and plagiarism, the work will be sent to the Peer Review Committee for review through email. AMRJ do not disclose the details of researcher to Peer Review Committee. The Peer Review Table will be displayed online according to the criteria decided by the Editorial Board. After the approval by Peer Review Committee, the research work will be published in the Issue. In case if any instructions received from Peer Review Committee, the same will be forwarded to the researcher and he/she will be asked to clear the matter. Editorial Board of AMRJ will be the final authority to decide whether a research work is to be published or not.*

**AMRJ Disclaimer:**

*For the purity and authenticity of any statement or view expressed in any article. The concerned writers (of that article) will be held responsible. At any cost member of Akshara's editorial Board will not be responsible for any consequences arising from the exercise of Information contained in it.*

E- ISSN 2582-5429
AMRJ
Akshara Multidisciplinary Research Journal
Single Blind Peer Reviewed & Refereed International Research Journal
April 2024 Special Issue 12 Volume V SJIF Impact- 5.67

# Index


| Sr.No | Title of the Paper | Author's Name | Pg.No |
|---|---|---|---|
| 1 | Specific Aspects of Formation of Numerical Lexemas in Pali Language | Dr. Sirojiddin S. Nurmatov | 05 |
| 2 | Wildlife conservation and management in India | Anjali Agrawal<br>Dr. Kaushlendra Kumar | 08 |
| 3 | लोकगीतों का महत्व | प्रा.डॉ. गौतम कुवर | 11 |
| 4 | सुकन्या समृद्धी योजनेचा परिणाम :- एक चिकित्सक अभ्यास | प्रा.नंदकिशोर प्रेमचंद सिंगाडे | 14 |
| 5 | सुधा अरोड़ा का उपन्यास 'यही कही था घर' में चित्रित नारी विमर्श | डॉ. मेदिनी अंजनीकर | 17 |
| 6 | Later Medieval Period Burhanpur through the Eyes of European Travelers" (With Special Reference as a Tourist Place) | Dr. P. S. Premsagar | 19 |
| 7 | उत्तममातृत्वस्य कृते पारस्करगृह्यसूत्रे विहितानां विधानानां प्रासङ्गिकता | सरोज महानन्दः<br>प्रो. (डा.) सुवास चन्द्र दाशः | 24 |
| 8 | Socio-Economic study of Rural Students in Higher Education: A Case Study | Dr. D. N. Patil<br>Dr. Vinod M. Magadum | 30 |
| 9 | Emotional intelligence and personality among single children | Dr.Seema Suresh Bari<br>Dr.Shashikant H. Khalane | 32 |
| 10 | परम्परावादी हिंदी आलोचना : स्वरूप, विकास एवं महत्व | नसीम उद्दीन | 36 |
| 11 | छायावादी युग में निराला की राष्ट्रीय भावना | मीनाक्षी अवस्थी | 39 |
| 12 | Theme of Urbanity and Modernity in Poems of Nissim Ezekiel | Dr. Neelam Mulchandani | 42 |
| 13 | समकालीन हिंदी कविता में आदिवासी चेतना | डॉ. शिंदे नवनाथ सर्जेराव | 47 |
| 14 | Economic Challenges and Solutions for Scheduled Tribes in the Melghat Region | Mr. Vivek M. Morey | 51 |
| 15 | The Dynamics of Neo-liberal Economy: Unraveling Policies and Their impact on Indian Agriculture | Juli<br>Dr. Sujata Mainwal | 54 |
| 16 | मराठी लोकसाहित्यातून प्रकट झालेली राष्ट्र भावना | प्रा. सबाना हमीद तडवी | 59 |
| 17 | निवेदन कौशल्य | प्रा.डॉ.सौ.वंदना वि.नढे | 63 |
| 18 | प्रदुषणाचा मानवी जीवनावर होणारा परिणाम | प्रा. डॉ. सुनील आनंदा पाटील | 66 |
| 19 | विकासाच्या प्रकाशात मानवप्राण्याच्या अस्तित्वावर निर्माण झालेले दुर्लक्षित धोके | डॉ. शरद कैलास अग्रवाल | 68 |
| 20 | हिंदी भाषा के विकास में हिंदी सिनेमा का योगदान | प्रा. डॉ. भाई गौतम भाईदास कुँवर | 72 |
| 21 | वाटा-पळवाटा या नाटकातील काकाजीचे व्यक्तिचित्र | डॉ. अविनाश श. धोबे | 74 |
| 22 | मराठीतील लेखकपत्नींच्या आत्मचरित्र निर्मितीची पार्श्वभूमी | प्रा. डॉ. महेश सखाराम बावधनकर | 77 |
| 23 | समकालीन हिंदी कविता में लोकतांत्रिक चेतना | डॉ. संतोष नागरे | 83 |
| 24 | मैत्रेयी पुष्पा का उपन्यास इदन्नमम 'अँचल जीवन की दास्तां है | डॉ. अंजीर नथ्थू भील | 86 |
| 25 | NEP 2020 and Scope for English in Higher Education | Dr. Pramod B. Patil | 89 |

E- ISSN 2582-5429

AMRJ

Akshara Multidisciplinary Research Journal

Single Blind Peer Reviewed & Refereed International Research Journal

April 2024 Special Issue 12 Volume V

SJIF Impact- 5.67


| Sr.No | *Title of the Paper* | Author's Name | Pg.No |
|---|---|---|---|
| 26 | PRAMĀṆA IN INDIAN PHILOSOPHY | Krupa Shah | 93 |
| 27 | Preferential Inclinations Regarding Marketing Strategies Employed By Banks | Imran Saudagar | 98 |
| 28 | Social status of rap victim women in Rajasthan : role of judiciary in providing justice(a general study on rap victim women's specially in Jaipur district) | Dr. Kana Ram Kumawat | 102 |
| 29 | आधुनिक हिंदी ग़ज़ल साहित्य में निरूपित : विविध आयाम | डॉ. ईश्वर ठाकूर | 105 |
| 30 | Significance of the Account of Silk Road Pilgrim: Hwi Chao | Dr. P. S. Premsagar | 108 |
| 31 | शैक्षणिक धोरण म्हणजे काय ? | डॉ . अजितकुमार भिमराव पाटील | 112 |
| 32 | Air quality index and heavy metals of Dhanpuri in all season in 2021 | Anamika Agrawal<br>M.K. Bhatnagar | 115 |
| 33 | Study of common water Borne diseases & theirs impact on human health & preventive measures, with special references in Shahdol District | Anjali Agrawal<br>Dr. Kaushlendra Kumar | 120 |
| 34 | E-Commerce: Benefits and Challenges in an Emerging Economy | Dr. Sanjeevani D. Munde | 124 |
| 35 | World Peace and Education | Dr. Pratibha D.Suryawanshi | 129 |
| 36 | प्रेमचंद द्वारा चित्रित कृषक और कृषक जीवन | बाबासाहेब गणपतराव इंगोले | 132 |
| 37 | डॉ. पारुकान्त देसाई कृत बाल कहानी 'चींटी ने ऊंट को जनम दिया' | प्रियंकाबहन नारणभाई वाघेला | 135 |
| 38 | गुना जिले (म.प्र.) में सौलर पम्पों की कालिक एवं स्थानिक प्रवृत्ति का विश्लेषणात्मक अध्ययन, | डॉ. मनोज धाकड़ | 138 |
| 39 | धौलपुर जिले में कृषि विकास की प्रवृत्तियाँ एक भौगोलिक अध्ययन | डॉ. सचिन कुमार | 142 |
| 40 | नासिरा शर्मा के उपन्यासों में निहित समस्याएँ | रेखा रानी | 147 |

E- ISSN 2582-5429
AMRJ
Akshara Multidisciplinary Research Journal
Single Blind Peer Reviewed & Refereed International Research Journal
April 2024 Special Issue 12 Volume V
SJIF Impact- 5.67

07

# उत्तममातृत्वस्य कृते पारस्करगृह्यसूत्रे विहितानां विधानानां प्रासङ्गिकता

प्रो. (डा.) सुवास चन्द्र दाशः
अवसरप्राप्तविभागाध्यक्षः
उत्कलविश्वविद्यालयः, वाणीविहारः, भूवनेश्वरम्, ओडिशा

सरोज महानन्दः
शोधछात्रः
उत्कलविश्वविद्यालयः, वाणीविहारः, भूवनेश्वरम्, ओडिशा

## १.० उपक्रमः

सायणमतानुसारेण इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयत्ति स वेदः। अङ्ग्यते गम्यते ज्ञायते अमीभिरिति अङ्गानि। अर्थात् यैः साधनैः कस्यचित् वस्तुनः स्वरूपज्ञानं भवति, तदङ्गमिति कथ्यते। वेदस्य अङ्गानि-वेदाङ्गानि । 'अङ्गम्' इति शब्दः सहायवाचकः। इत्थं वेदानामर्थज्ञाने तेषामुच्चारणे, वेदमन्त्राणां सस्वरपाठे, तेषां यज्ञादिषु विनियोगे च यानि सहायकानि, तान्येव वेदाङ्गानीति वेदाङ्गानां वेदाङ्गता। वेदाङ्गैरिव वेदमन्त्राणामर्थाः स्वराः पदपाठादयश्च ज्ञायन्ते। वेदाङ्गानि षट् संख्याकानि । यथा शिक्षा, कल्पः, व्याकरणम्, छन्दः, निरुक्तं, ज्योतिषम् चेति। उक्तञ्च पाणिनीयशिक्षायाम् –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**
**तस्मात्साङ्गमधीत्येव ब्रह्मलोके महीयते ।।**[१]

## १.१ कल्पः

वेदाङ्गेषु कल्पसूत्रस्य स्वतन्त्रोऽपयोगिता अस्ति । कल्पशास्त्रस्य नामान्तरं भवति सूत्रसाहित्यम् । ब्राह्मणकाले यागस्य तावान् प्रचारो जातो यत्तेषां यथावज्ज्ञानाय पूर्णपरिचयप्रदायकग्रन्थानामावश्यकताऽनुभूयते स्म, तामेवावश्यकतां स्वल्पैः शब्दैः पूरयितुं कल्पसूत्राणि विरचितानि । सायणाचार्येण ऋग्वेदभाष्यभूमिकायां कल्पशब्दस्य व्युत्पत्तिं कुर्वता कथितम् –कल्प्यते समर्थ्यते यागप्रयोगोऽत्र इति कल्पः। अर्थात्, यत्र यज्ञविधीनां कर्मणां च क्रमानुसारं वर्णनं दृश्यते, सः कल्पः । अत एव कथितम् विष्णुमित्रेण: –''कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्।'' कल्पसूत्रं चतुर्विधम् -

१. श्रौतसूत्रम् – अत्र यागादिनां विस्तृतविवेचनं तेषां साररूपं विश्लेषणं च दृश्यते ।
२. गृह्यसूत्रम् – अत्र पञ्चमहायज्ञानां यथा ब्रह्म-देव-पित्रातिथिवलिवैश्वदेवयज्ञानां स्वरूपप्रतिपादनं, षोडशसंस्काराः, गृह्यप्रवेशं, भूमिकर्षणं, शस्यवर्द्धनादिव्यापारेषु लघुयज्ञानां संकलनञ्च क्रियते ।
३. धर्मसूत्रम् – अत्र चतुवर्णाश्रमस्य कर्त्तव्यम्, राज्ञां कर्त्तव्यम्, प्रायश्चितः नियोगनियमः, दायभागः, नित्यनैमित्तिकादिकर्माणि प्रतिपाद्यन्ते ।
४. शुल्वसूत्रम् – अत्र यज्ञवेदीनिर्माणप्रविधिः वर्ण्यते ।

आर्यसंस्कृतेः अखण्डज्ञाननिधिभावेन विद्यमानः वेदः ऋग्-यजुः-साम-अथर्वभेदेन चतुर्धा विभज्यते । चतुर्षु वेदेषु चत्वारि कल्पसूत्राणि सन्ति ।

**ऋग्वेदस्य कल्पसूत्रम्–** आश्वालायनं शाङ्खायनञ्च । अनयोरुभयोरपि कल्पसूत्रयोः श्रौतसूत्रं गृह्यसूत्रं च सम्मिलितं विद्यते । शुक्लयजुर्वेदस्य कल्पसूत्रम्, कात्यायनश्रौतसूत्रम्, पारस्करगृह्यसूत्रम्, कात्यायनशुल्वसूत्रञ्च ।

**कृष्णयजुर्वेदस्य कल्पसूत्रम्–** बौधायनसूत्रम् आपस्तम्बसूत्रञ्च । अनयोः कल्पसूत्रयोः श्रौतगृह्यधर्मशुल्वसूत्राणि सर्वाण्यपि सन्तीति ग्रन्थावेभौ पूर्णरूपौ ।

**सामवेदस्य कल्पसूत्रम्–** लाट्यायनश्रौतसूत्रम् द्राह्यायणञ्च । जैमिनीयशाखायाः श्रौतसूत्रं जैमिनिगृह्यसूत्रम् गोभिलगृह्यसूत्रम् खदिरगृह्यसूत्रञ्च । सामवेदे एव आर्षेयकल्पस्यापि गणना भवति, अयमेव कल्पो मशककल्पसूत्रनाम्नाऽपि प्रथते । सूत्रमिदं लाट्यायनश्रौतसूत्रात्प्राचीनं मन्यते।

**अथर्ववेदस्य कल्पसूत्रम्–** वैतानश्रौतसूत्रम्, कौशिकसूत्रञ्च । वैतानसूत्रं नातिप्राचीनम्, कौशिकसूत्रञ्चाभिचारक्रियावर्णनपरम् ।

## १.२ पारस्करगृह्यसूत्रम्

E- ISSN 2582-5429
AMRJ
Akshara Multidisciplinary Research Journal
Single Blind Peer Reviewed & Refereed International Research Journal
April 2024 Special Issue 12 Volume V SJIF Impact- 5.67

पारस्करगृह्यसूत्रं यजुर्वेदान्तर्गतं शुक्लयजुर्वेदीयगृह्यसूत्रमस्ति । एतस्य रचनाकार: भवति महर्षि: पारस्कर: । स: विशिष्टवैयाकरणाचार्यस्य अष्टाध्यायीग्रन्थप्रणेतु: महर्षिपाणिने: पूर्ववर्ती आसीत् । महर्षिपाणिनिना पारस्करप्रभृतीनि च संज्ञायां (पा.६/१/१५७) इति सूत्रे पारस्करशब्दस्य उल्लेख: कृत: । अस्मात् ज्ञायते पारस्कर: पाणिने: पूर्ववर्त्ती आसीत् ।

पारस्करगृह्यसूत्रम् शुक्लयजुर्वेदस्य द्वयो: शाखयो: प्रतिनिधित्वं करोति। हिलब्राण्डानुसारं पारस्करगृह्यसूत्रं वाजसनेयगृह्यसूत्रनाम्ना विख्यातमस्ति। एतद् पारस्करगृह्यसूत्रम् कातीयगृह्यसूत्रम् इति कथ्यते । पारस्करगृह्यसूत्रेऽस्मिन् त्रीणि काण्डानि सन्ति । प्रथमकाण्डे उनविंशति: कण्डिकानि, द्वितीयकाण्डे सप्तदश कण्डिकानि, तृतीयकाण्डे च पञ्चदश कण्डिकानि सन्ति। पारस्करगृह्यसूत्रस्योपरि पञ्च भाष्यग्रन्था: उपलभ्यन्ते । पञ्चभाष्यसम्वलितं पारस्करगृह्यसूत्रस्य संस्करणमेकं १९७७ख्रीष्टाब्दे गुजुरातीप्रेस् मुम्बाइत: प्रकाशितमासीत् ।

पारस्करगृह्यसूत्रे विवाहविधे: आरभ्य विविधानां संस्काराणां, विविधानां यज्ञानां, समाजव्यवस्थाया: विविधानां तत्त्वानां च वर्णनमस्ति । इदं गृह्यसूत्रं समाजस्य समृद्धिं प्रकाशयितुं सर्वथा समर्थमस्ति ।

**१.३ पारस्करगृह्यसूत्रे प्रतिपादितानां उत्तममातृत्वस्य विधानानां प्रासङ्गिकता**

उत्तममातृत्वस्य विधानं शिशो: मातृगर्भे अवस्थानकाले न प्रारभ्यते, अपितु वैवाहिकजीवनस्य प्रारम्भादेव इयं प्रक्रिया भवति । मानवजाते: संरक्षणस्य श्रेष्ठतम: उपाय: भवति वंशरक्षा । एतदर्थं सन्तानोत्पत्ति: भवति एकं महत्वपूर्णसाधनम् । वंशस्य मर्यादारक्षा उत्तमसन्तानस्योपरि न्यस्ता भवति । भविष्यत्काले शिशु: समाजनिर्माणे परिचालनेऽपि प्रमुखभूमिकां गृह्णाति । अत: शिशो: शारिरीक-मानसिक्यभिवृध्यर्थं मातु: उत्तममातृत्वम् अनिवार्यम् । इदं महदुद्देश्यं मनसि निधाय महर्षिपारस्करेण गृह्यसूत्रेऽस्मिन् गर्भाधानादिसंस्काराणामुपस्थापना कृता ।

पुरुषष्य वीजगतदोष: तथा नार्य: गर्भगतदोष: उत्तमसन्तानप्राप्तये वाधका: सन्ति । अत: वरवध्वो: एते ये ये शारिरीकादिदोषा: स्यु:, अस्य निवारणाय विवाहस्य चतुर्थीकर्मणि अग्निस्थापनपर्वणि वायुदेवताया: स्तुतिपूर्वकं निम्नोक्त: मन्त्र: उच्चार्यते -

**वायो प्रायश्चिते त्वं देवानां प्रायश्चित्तिरसि**
**ब्राह्मणस्त्वा नाथकाम उपधावामि,**
**यास्यै प्रजाघ्नी तमुस्तामस्य नाशय स्वाहा।।**[२]

स्त्रीशरीरे ये ये गर्भदोषा: सन्ति तथा च पुत्रोत्पत्तिप्रक्रियायां ये ये विघ्ना: सन्ति, तेषां सर्वाणां विनाशं वायुदेव: करोतु इति मन्त्रस्यास्य आशयो भवति ।

गृहस्थस्य चरमप्रयोजनमस्ति सन्तानोत्पत्ति: । सन्तान: एक: शक्तिपिण्डरूपेण पत्नीशरीरे अवस्थानं करोति । अत: गर्भाधानं न केवलमेक: संस्कार: शारिरीकं मिलनञ्च, अपितु आत्माद्वयस्य मिलनम् भवति । आत्माद्वयं एकीभूय नवनिर्मिते पिण्डे प्रविशति । उच्यते यत् -

**प्राणैस्ते प्राणानत्सन्दधाम्यस्थिभिरस्थीनि मा सैर्मा सानि त्वचा त्वचमिति।।**[३]

वैदिककाले साम्प्रतिककाले च गर्भाधानप्रक्रिया सहजसाध्या न भवति । गर्भवती स्त्री गर्भावस्थायां बहुसमस्यामध्ये अग्रेसरति । स्त्रीणां गर्भाधानक्षेत्रे दृश्यमानस्य असौविध्यस्य निवारणाय पारस्करगृह्यसूत्रे बहूनि विधानानि उल्लिखितानि सन्ति । यथा- पुष्यनक्षत्रे यदा चन्द्रस्य योग: भवेत्, तदा पति: शुद्धपूत: सन् उपवासं कृत्वा यदि श्वेतपुष्पयुक्त-कण्टककारिकावृक्षात् श्वेतपुष्पाणां संग्रहं कुर्यात् । तदनन्तरं पत्न्या: रजोदर्शनस्य चतुर्थदिवसे शौचादिक्रियादनन्तरं रात्रकाले पति: श्वेतपुष्परसं जलेन मिश्रणं कृत्वा विन्दुद्वयपरिमितं पत्न्या: दक्षिणनासिकारन्ध्रे मन्त्रोच्चारणपूर्वकं अभिसिञ्चेत् चेत् पत्नी गर्भवती भवेत् । तथा चोक्तम् यत्–

**इयमोषधी त्रायमाणा सहमाना सरस्वती।**
**अस्या अहं वृहत्या: पुत्र: पितुरिव नाम जग्रभमिति।।**[४]

स्त्रिय: ऋतुकालस्य चतुर्थरात्रीत: आरभ्य षोडशरात्रीं पर्यन्तं गर्भधारणार्थं उपयुक्तासमय: इति मनुना उक्तम्।यथा-

**ऋतु: स्वाभाविक: स्त्रीणां रात्रय: षोडश स्मृता:।**
**चतुर्भिरितरै: सार्द्धमहोभि: सद्विगहितै:।**[५]

E- ISSN 2582-5429

AMRJ

Akshara Multidisciplinary Research Journal

Single Blind Peer Reviewed & Refereed International Research Journal

April 2024 Special Issue 12 Volume V

SJIF Impact- 5.67

वौधायनगृह्यसूत्रे अपि अस्मिन् विषये वर्ण्यते यत्- **ऋतुकालात् आरभ्य: षोडशरात्रीं यावत् गर्भाधान- निमित्तं संभोग: कार्य:। तत्र अन्तिमरात्रि: विशिष्यते।**[६]

ऋतुकालात् पूर्वस्मिन् रात्रौ यदि स्त्रिय: गर्भाधानं भवति, तर्हि समुचित: भाग्यसम्पन्न: गुणवान्सन्तान: भविष्यति, चतुर्थे रात्रौ अनुष्टितगर्भाधानेन स्वल्पायु: तथा धनहीन: सन्तान: भविष्यति, पञ्चमे रात्रौ अनुष्टितगर्भाधानेन सन्तति: भविष्यति, षष्ठे रात्रौ उदासीनसन्तान: भविष्यति, सप्तमरात्रौ जाता कन्या वन्ध्या भविष्यति, नवमरात्रौ गर्भाधानेन शुभकन्या जनिष्यति, दशमरात्रौ श्रेष्ठपुत्रसन्तानं लभ्यते त्रयोदशरात्रौ व्यभिचारिणी कन्या जनिष्यति, चतुर्दशरात्रौ जात: पुत्र: धार्मिक: कृतज्ञ: संयमी दृढ: प्रतिज्ञाशील: च भविष्यति, पञ्चदशरात्रौ जाता कन्या अनेकपुत्रस्य माता भविष्यति, षोडशरात्रौ जात: पुत्र: विद्वान् सत्यवादी जितेन्द्रियपुरुष: भविष्यति।

पुनश्च महर्षिमनुना गर्भाधानस्य कालरात्रम् अभिलक्ष्य जायमानस्य सन्तानस्य लिङ्गभेदं निरुप्यते।यथा:-

**युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।**
**तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम्।।**[७]

उत्तममातृत्वस्य कृते गर्भाधानसंस्कारस्य महती भूमिका वर्त्तते।न केवलं सूत्रग्रन्थदृष्ट्यां अपितु वैज्ञानिक: दृष्ट्याऽपि संस्कारोऽयं महत्वपूर्णमस्ति।यदा स्त्रिय: मनसि कामभावनाम् उत्पद्यते, तदा हि समागमस्य कृते समुचित: समय:। यथा वुभुक्षासमये भोजनस्य पिपासासमये जलस्य च ग्रहणं भवति तथैव। यदि पुरुष: स्त्रिय: अनिच्छायां तया सह सहवासं करोति,तर्हि नूनं स्त्री अनेकै: स्नायुगतरोगै आक्रान्ता भवति ।

स्त्रिय: शरीरे संभोगार्थं केचन जीववैज्ञानिनियमा: वर्त्तन्ते । यासां स्त्रीणां ऋतुस्त्राव: उत्तमरूपेण न भवति । ता: स्त्रिय: गर्भाधानात् वञ्चिता: भवन्ति । अत: तद्दोषदूरीकरणाय औषधोपचारादि: वर्त्तते ।

उत्तममातृत्वस्य कृते अपरं विधानं पुंसवनसंस्कारमस्ति। गृह्यसूत्रानुसारम् अयं संस्कार: गर्भाधानात् परं तृतीये मासि चतुर्थमासि वा क्रियते । गर्भगतिशीलात् प्राक् अयं संस्कार: कर्त्तव्य: इति याज्ञवल्क्यमहर्षिणा कथ्यते। तथा हि- **गर्भाधानमृतौ पुंसवनं स्पन्दनात् पुरा।**[८]

शौनकमतेन- **व्यक्ते गर्भे तृतीये तु मासे पुंसवनं भवेत् ।**
**गर्भोऽव्यक्तस्तृतीये चतुर्थे मासि वा भवेत्।।**

संस्कारोऽस्मिन् गर्भिण्या: प्रात: स्नात्वा धौताम्वरं परिधानं करोति, रात्रौ पटप्ररोहं, कुशकण्टकं, सोमलताखण्डं च जलेन पिष्ट्वा रसं निसार्य गर्भिणीस्त्रिय: दक्षिणनासापुटे तस्या: भर्ता हिरण्यगर्भमिति मन्त्रद्वयोच्चारणपूर्वकं दद्यात् । तथा हि-

**हिरण्यगर्भ: समवर्ततागे्र भूतस्य जात: पतिरेक आसी**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।**
**अद्भ्य: सम्भृत,पृथिव्यै रसाञ्च विश्वकर्मण: समवर्त्तताग्रे ।**
**तस्य त्वष्टा विदधद्रूपमिति तन्मर्त्यस्य देवत्वमाजानमग्रे।।**[९]

पिता यदि वीर्यवन्तं पुत्रम् इच्छति तत: एकेन जलपात्रेण गर्भिण्या: सूपर्णोऽसि इति मन्त्रं उच्चारयति। यथा-

**ओम् सूपर्णोऽसि गुरूत्मांस्त्रीवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे**
**पक्षौ स्तोम आत्मा च्छन्दा स्यंगानि यजुषि नाम।**
**साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्या: शफा:।**
**सुपर्णोऽस्ति गुरुत्मान् दिवं गच्छ: स्व: पत:।।**[१०]

उत्तममातृत्वस्य अन्येक: पक्ष: ध्रुवदर्शनम् अस्ति, विवाहानन्तरं वध्वा: ध्रुवदर्शनाय संस्कार: भवति। अनेन संस्कारेण भार्या सम्यक् प्रकारेण सन्तानपालनं कर्तुं जीवितुं च शक्नोति । तथा हि-

**ध्रुवमसि ध्रवं त्वा पश्यामि ध्रुवैधिपोष्ये मयि मह्यं त्वादाद् वृहस्पतिर्मया पत्या प्रजावती संजीव शरद: शतम् इति।।**[११]

अर्थात्, अत्र पति: पत्नीं कथयति- हे वधु त्वं शाश्वती असि । यत: अहं त्वां ध्रुवतारकां दर्शयामि । अत: त्वं मया पोषणीया मत्प्रजापोष्ट्री वा भव । एतदर्थं बृहस्पतिर्ब्रह्मा त्वां मह्यं दत्तवान् । त्वं मया सह पुत्रपौत्रादियुक्ता सन्ती शतं वर्षाणि सुखेन जीव । उत्पन्नस्य वालकस्य दीर्घायुष्याय बुद्धिविकाशाय च नाडिछेदनात् पूर्वं मेधाजननसंस्कार: क्रियते । तद्यथा-

**जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननाऽऽयुष्ये करोति ।**[१२]

पुनश्च जातकर्मसंस्कारेऽस्मिन् जातस्य बालकस्य परिपुष्टार्थं तेजोयुक्तकरणाय च नवजातस्य बालकस्य पिता सुवर्णाच्छादितया अनामिकाऽङ्गुल्या नवजाताय बालकाय मधुसंयुक्तं घृतम् अथवा केवलं घृतं दत्वा निम्नलिखित मन्त्रस्य जपं कृत्वा बालकं प्राशयति । तथा हि-**अनामिकया सुवर्णान्तिर्हितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवःस्वः सर्वं त्वयि दधामीति ।**[१३]

जातकर्मसंस्कारे विहितः अयं घृतप्राशनविधिः विज्ञानसम्मतोऽस्ति । वैज्ञानिकानां मतेन यस्य देशस्य जनाः दुग्धदधिघृतादीन् भोजनरूपेण गृह्णन्ति, तस्य देशस्य जनाः दीर्घजीविनः भवन्ति ।

वीरपुत्रलाभः प्रतैकदम्पत्योः इच्छा आशा च भवति । अतः वीरपुत्रप्रसवार्थं पतिः स्वस्य गर्भवतीभार्यां वीरगाथां श्रावयतीति गृह्यसूत्रकारेण पारस्करेण उल्लिखितम् । यथा-

सरस्वति प्रेदमव सुभगे वाजिनीवति ।
यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः।।
यस्यां भूतंऽसमभवत् यस्यां विश्वमिदं जगत् ।
तामद्य गाथां गास्यामि ता स्त्रीणामुत्तमं यश इति।।[१४]

नवजातस्य बालकस्य आरोग्यार्थं बुद्धिविकाशाय च सूर्यदर्शनस्य विधिः बहिर्निष्क्रमणसंस्कारेण क्रियते । तथा हि-

**चतुर्थमासि निष्क्रमणिका।**[१५]

विशिष्टस्मृतिकारः मनुः चतुर्थमासे बालस्य स्वगृहनिष्क्रमणमादित्यदर्शनादिकार्यं करणीयमिति सूचयति। तद्यथा-

**चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात् ।**

स्मृतिकारः याज्ञवल्क्योऽपि आह-

**अहन्येकादशे नाम चतुर्थमासि निष्क्रामः ।**[१६]

शङ्खस्मृतेः पुनः उल्लिखितमस्ति।यथा-

**चतुर्थे मासि कर्तव्यमादित्यस्य प्रदर्शनम्।**[१७]

अतः शिशोः वहिरागमनं निष्क्रमणं संस्कारः वा चतुर्थे मासि भवति इति ज्ञायते । केचन विद्वांसः अयं संस्कारः अदित्यसंस्कारः इति कथयन्ति। चतुर्थे मासि सन्तानस्य सूर्यदर्शनस्य क्षमता संभवति । अतः चतुर्थे मासे सूर्यदर्शनम् समीचीनम् इति कथ्यते । वैज्ञानिकदृष्ट्या सूर्यकिरणस्य महती भूमिका वर्तते । शरीरस्य विकासार्थं जीवसार-घः इत्यस्य आवश्यकता वर्त्तते । जीवसार-घः प्रभातसूर्यकिरणात् प्राप्यते। अतः सन्तानस्य परिवर्धनाय प्रातःकालस्य सूर्यकिरणस्य अतीव आवश्यकता अस्ति।

उत्तममातृत्वाय सन्तानस्य सम्यक् परिवर्द्धनाय च जन्मनः एव सन्तानः मातुः स्तन्यपानं कृत्वा जीवनयापनं करोति । परन्तु भोजनमेकं जीवनमाधायकं तत्त्वम् । अतः आचार्यः पारस्करः स्वगृह्यसूत्रे वर्णितम् अस्ति-

**षष्ठे मासेऽन्नप्राशनम्।।**[१८]

स्तनपानं त्यक्त्वा शिशुः षष्ठे सप्तमे मासि वा अन्नं भुङ्क्ते इति शुश्रुतः उक्तवान् । लघुभोजनं शिशोः कृते स्वास्थ्यवर्द्धकं भवतीत्यपि शुश्रुतेन कथ्यते । तद्यथा-**षण्मासञ्चेनमन्नं प्राशयेल्लघु हितञ्च ।**[१९]

प्राथमिकभोजनं विधिपूर्वकं कर्तव्यम्। देवतापूजनपूर्वकम् कर्ममेतत् क्रियताम् । कारणं देवाः शिशोः रक्षकाः शक्तिप्रदायकाश्च । तथा हि -

**विधिपूर्वकं भोजनाय स्मृतिकाराः उपनिषदः वेदाश्चेपदिशन्ति ।**[२०]

याज्ञवल्क्यस्मृत्यानुसारम्- **षष्ठे अन्नप्राशनं कर्म क्रियते ।**[२१]

पञ्चमे,षष्ठे,सप्तमे,अष्टमे,नवमे,दशमे,एकादशे,द्वादशे मासे संवत्सरे पूर्णे वा अन्नप्राशनं करणीयम् इति वीरमित्रोदयसंस्कारप्रकाशे उल्लेखोऽस्ति । यथा-**जन्मतो मासि षष्ठे स्यात् सौरेणोत्तममन्नदम्। /तदभावेऽष्टमे मासि नवमे दशमेऽपि वा ।।/द्वादशे वाऽपि कुर्वीत प्रथमान्नशनं परम् ।/ संवत्सरे वा सम्पूर्णे केचिदिच्छन्ति पण्डिताः।।**[२२]

भोजनस्य प्रकारविषयेऽपि पारस्करगृह्यसूत्रे उल्लिख्यते । शिशुभ्यः सर्वप्रकारकं विभिन्नस्वादयुक्तं भोजनं प्रदद्यात् । तथा चोक्तं पारस्करगृह्यसूत्रे-

E- ISSN 2582-5429
Akshara Multidisciplinary Research Journal
Single Blind Peer Reviewed & Refereed International Research Journal
AMRJ
SJIF Impact- 5.67
April 2024 Special Issue 12 Volume V

प्राणेनान्नमशीय स्वाहाऽपानेन गन्धानशीय स्वाहा ।
चक्षुषा रूपाण्यशीय स्वाहा श्रोत्रेण यशोऽशीय स्वाहेते ।।[२३]

अन्नप्राशनसंस्कारावसरे यज्ञ: अनुष्ठीयते, यज्ञे अन्नं आहुतिरूपेण दीयते, शिशो: पुष्ट्यर्थ स्वास्थ्यरक्षार्थ यशोवर्धनार्थ च प्रार्थना क्रियते ।। तथा हि -**देवी वाचमजनयन्त देवास्तां विश्वरूपा: पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दूहाना धेनुर्वागस्मानुपसुष्ठुतैतु स्वाहेति वाजो नो अद्येति च।**[२४]

क्रमश: मातु: स्तन्यपानात् शिशो: पृथककरणकरणार्थमपि अन्नप्राशनसंस्कार: क्रियते । शिशो: स्वास्थ्यरक्षां प्रति दृष्टिं प्रदाय माता प्रयत्नपूर्वकं स्तन्यपानादमुं शिशुं निवर्तयति । एकवर्षपर्यन्तं शिशुं स्तन्यपानात् न निवारयेत् । उत्तममातृत्वस्य प्रस्फुटनाय अन्नप्राशनसंस्कारस्य प्रासङ्गिकता सर्वै: अनुभूयते । यतो हि जन्मकाले शिशो: दन्ता: न अङ्कुरिता: भवन्ति । अत: तस्य कृते केवलं माता दुग्धभोजनं दीयते । दन्तं विना भक्षणक्रिया असम्भवा । षष्ठे मासे शिशो: दन्ता: आगच्छन्ति । अत: षष्ठे मासे अन्नप्राशनसंस्कारकरणं सर्वथोचितम् ।

**१.४ उपसंहार:** नवजातशिशो: व्यक्तित्वस्य विकाशाय एव वैदिककाले बहुविधानां संस्काराणाम् अयमारम्भ: अभवत् । उत्तमनातृत्वाय पारस्करगृह्यसूत्रे अनेकेषां गर्भाधान-पुंसवन-जातकर्म-निष्क्रमण-अन्नप्राशनप्रभृतीनां संस्काराणां वीरगाथाश्रवणादीनां विधानानाञ्च उल्लेखोऽस्ति । साम्प्रतिकयुगेऽपि येषां संस्काराणां विधानानाञ्च वैज्ञानिकी प्रासङ्गिकता अस्ति ।

संदर्भ ग्रन्थ सूची (Bibliography)

१. पा. शि.- ४१,४२
२. पारस्करगृह्यसूत्रम्-१/११/२
३. पारस्करगृह्यसूत्रम्-१/११/५
४. पारस्करगृह्यसूत्रम्-१/१३/१
५. मनुस्मृति:- ३/४६
६. बोधायनगृह्यसूत्रम्-१/७/४७
७. मनुस्मृति:- ३/४८
८. याज्ञवल्क्यस्मृति:- १/११
९. वी.मि.सं भाग-१, पृ.-१३७
१०. पारस्करगृह्यसूत्रम्-१/१४/६
११. पारस्करगृह्यसूत्रम्-१/०८/१९
१२. पारस्करगृह्यसूत्रम्-१/१६/३
१३. पारस्करगृह्यसूत्रम्-१/१६/४
१४. पारस्करगृह्यसूत्रम्-१/७/२
१५. पारस्करगृह्यसूत्रम्-१/५/९
१६. याज्ञवल्क्यस्मृति:- २/३४
१७. शङ्खस्मृति:- २/४
१८. पारस्करगृह्यसूत्रम्-१/१९/१
१९. सुश्रुतसंहिता- १०/६४
२०. तैत्तिरीयोपनिषद् – ३/७/१
२१. याज्ञवल्क्यस्मृति:- १/१२
२२. वी.मि.सं भाग-०१
२३. पारस्करगृह्यसूत्रम्-१/१९/४
२४. पारस्करगृह्यसूत्रम्-१/१९/२-३

सहायक ग्रन्थ सूची (Bibliography)

1. ऋग्वेद-भाष्य-भूमिका, रामअवधपाण्डेय:,मोतीलालबनारसीदास:, दिल्ली, द्वितीयसंस्करणम्-१९७३
2. पाणिनीयशिक्षा, विद्यासागररायदामोदर:,मोतिलालबनारसीदास:,प्रथमसंस्करणम्-१९९०
3. पारस्करगृह्यसूत्रम् अर्थभास्करभाष्य-मन्त्रभाष्यसमन्वितम्, रामकृष्णशर्मा, हंसाप्रकाशनम्, जयपुरम्, वि.सं.-२०४७

E- ISSN 2582-5429

Akshara Multidisciplinary Research Journal

Single Blind Peer Reviewed & Refereed International Research Journal

April 2024 Special Issue 12 Volume V

SJIF Impact- 5.67

4. पारस्करगृह्यसूत्रम् मार्गदर्शिनीसहितम् , प.कूलमणिमिश्रशर्मा, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः), श्री सदाशिवपरिसरः, पुरी, प्रथमसंस्करणम्-१९८१

5. पारस्करगृह्यसूत्रम्, जगदीशचन्द्रमिश्रः,चौखम्बासूरभारतीप्रकाशनम्,वाराणसी,२०२०

6. पारस्करगृह्यसूत्रम्, ओम्प्रकाशपाण्डेयः,चौखम्बाअमरभारतीप्रकाशनम्, वाराणसी, प्रथमसंस्करणम्-१९८०

7. पारस्करगृह्यसूत्रम्, जमुनापाठकः, चौखम्बाविद्याभवनम्, वाराणसी, २०७७

8. मनुस्मृतिः, उर्मिला,जे. पी. पब्लिशिंग् हाउस्, दिल्ली, २००५

9. संस्कृत-हिन्दी-शब्दकोशः,वामनशिवराम-आप्ते, कमलप्रकाशनम्, नईदिल्ली, प्रथम संस्करणम् -१८९०

10. Vedic Bibliography,Volume sixth,R.N. Dandekar,Bhandarkar Oriental Research institute, Pune,India, 1st Edn,2004.